International Journal of Sanskrit Research 2020; 6(3): 34-38

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(3): 34-38
© 2020 IJSR
www.anantaajournal.com
Received: 20-03-2020
Accepted: 22-04-2020

**डाँ. सस्मिता साहु**

अध्यापिका, संस्कृत.विभागः,

पञ्चायत.महाविद्यालय:, बरगड़म्,

ओड़िशा, भारत

# श्रीमद्भगवत्गीताया: सांख्ययोगे मूल्यशिक्षा

**डाँ. सस्मिता साहु**

**सारांश:**
वेद- उपनिषद्- पुराण- रामायण- महाभारत- श्रीमद्भगवत्गीता- स्मृतिशास्त्र- नीतिशास्त्रं चेत्यादिषु संस्कृतग्रन्थेषु मूल्यशिक्षा स्पष्टतया आलोचितास्ति । एतेषु अष्टादशाध्याय-समन्वितायां श्रीमद्भगवत्गीतायां सर्वत्र मानवीयमूल्यबोध: दरीदृश्यते । तत्र द्वितीयोऽध्याये सांख्ययोगे द्विशप्ततिश्लोका: विद्यन्तेए यत्र मानवीयमूल्यनिर्धारणे शिक्षाया: महत्त्वं प्रतिपादितमस्ति । शैक्षिकानुष्ठाने छात्राणां चरित्रनिर्माणार्थं सर्वाङ्गीणविकासार्थं च मूल्यशिक्षा अपरिहार्या । फलाकांक्षा-त्यागपूर्वकं कर्त्तव्यकर्मकरणेन एव मानवजन्म सार्थको भवतीति शिक्षा भगवता श्रीकृष्णेन निगदिता । श्रीमद्भगवत्गीतायां प्रतिपादिता मूल्यशिक्षा शिक्षाव्यवस्थाया: सुपरिचालनार्थं सम्यक्-जीवनयापनार्थं च अत्यावश्यकी वर्तते । सांसारिक-आध्यात्मिकविकासयो: मूल्यमपि अत्र सूचितमस्ति । अस्मिन् लेखे दृढ़मनोभावनाए साहसिकताए आत्मसचेतनताए कर्त्तव्यपरायणताए कर्मयोगसाधनाए इन्द्रियसंयम: चेत्यादीनां मूल्यशिक्षा-सम्बन्धितानां विषयाणाम् विवेचनार्थं प्रयास: कृत: ।

उपक्रम:

मूल्यशब्द: लाटिन्-भाषाया: “Valerie” इति शब्दात् आगच्छति । यस्यार्थो “To be strong and Vigorous”.| दार्शनिका:, मनोवैज्ञानिका:, समाजशास्त्रिण: च मूल्यशब्दस्यास्य स्वस्व व्याख्यां कृतवन्त: । परन्तु अत्यावश्यकं मूल्यं व्यक्तिगतरूपेण सामूहिकरूपेण च मानवस्य बहुमूल्य-जीवनं प्रतिपादयति । दार्शनिकदृष्ट्या ज्ञानस्य एकमेव मूल्यं सत्य-शिव-सुन्दररूपात्मकेषु त्रिषु परिसरषु अन्तर्निहितमस्ति । मनोवैज्ञानिकानां मतानुसारं मूल्यं तदेव आन्तरिकम् आदेशसूचकं वर्तते, येन जीवनस्य परम-लक्ष्यप्राप्त्यर्थं मानवान् उत्तेजयति प्रेरयति च । समाजशास्त्रानुसारं समाजे मानवानां सम्यक्-व्यवहार: एव मूल्यशब्दस्यार्थ: । अर्थात् समायोजनं, अनुकूलनं, सहयोग:, आत्मसात्करणं चेत्यादीनां सामाजिक-प्रक्रियाणाम् एकत्रिकरणार्थं प्रोत्साहयति । अनन्तरम् आध्यात्मिकदृष्ट्या मूल्यशब्द: मानवस्य दैनन्दिन-कार्यक्रमे भगवत: वास्तविक-ज्ञानाभिवृद्धिं केन्द्रितं करोति । अत: अस्मात् ज्ञायते यत् दार्शनिक-मनोवैज्ञानिक-सामाजिक-आध्यात्मिकं चेत्यादिषु विविधेषु परिसरेषु मानवीयमूल्यबोध: अन्तर्भूक्तोऽस्ति ।

मूल्यं विना शिक्षा अकल्पनीया अचिन्त्यनीया वा । स्वामीविवेकानन्दस्य मतानुसारेण मूल्यशिक्षाया: व्यापक: अर्थो भवति कुशलनागरिकनिर्माणं चरित्रनिर्माणं च । वस्तुत: एक: शिक्षितमानव: जीवनस्य दैनन्दिनकार्येषु सर्वदा सर्वोच्च-मूल्यम् आत्मसात् करोति । एवञ्च अशिक्षितमानव: पशुतुल्यो भवति । कथितमस्ति यत् “ विद्या विहीन: पशु:”। (नीतिशतकम्) अत: मूल्यनिर्धारणे शिक्षा अत्यावश्यकी वर्तते । तथा च मूल्यानि अपि शिक्षा-प्रक्रियायां मूलोपादानरूपेण स्वीक्रियन्ते ।

संस्कृतकाव्यकवितासु आदर्शजीवनयापनार्थं मूल्यशिक्षाविषये स्पष्टतया वर्णितमस्ति । वेद-उपनिषद्-पुराण-रामायण-महाभारत-श्रीमद्भगवत्गीता-स्मृतिशास्त्र-नीतिशास्त्रं चेत्यादिषु ग्रन्थेषु मूल्यशिक्षा आलोचितास्ति । एतेषु कृष्णद्वैपायनेन महर्षि-वेदव्यादेन विरचितस्य महाभारतस्य भिष्मपर्वण: समानीता श्रीमद्भगवत्गीता प्रमुखा सर्वजनविदिता च । अस्यां गीतायां मूल्यशिक्षा सम्यक्तया प्रतिपादितास्ति । अष्टादश-अध्यायेषु समन्वितायां श्रीमद्भगवत्गीतायां सप्तशत-श्लोका:

**Corresponding Author:**
**डाँ. सस्मिता साहु**

अध्यापिकाए संस्कृत.विभागः,

पञ्चायत. महाविद्यालय:, बरगड़म्,

ओड़िशा, भारत

सन्ति । अस्यां सर्वशास्त्रमय्यां गीतायां सर्वत्र मानवीयमूल्यबोध: दरीदृश्यते । तत्र द्वितीयोऽध्याये सांख्ययोगे द्विशप्ततिश्लोका: विद्यन्तेए यत्र मानवीयमूल्यनिर्धारणे शिक्षाया: महत्त्वं प्रतिपादितमस्ति । शैक्षिकानुष्ठाने अपि छात्राणां चरित्रनिर्माणार्थं सर्वाङ्गीणविकासार्थं च एता: मूल्यशिक्षा: अपरिहार्या: । एतासु मूल्यशिक्षासु दृढमनोभावना, साहसिकता, आत्मसचेतनता, कर्त्तव्यपरायणम्, कर्मयोगसाधना, इन्द्रियसंयम:, वाक्-संयम: चेत्यादीनां विषयाणां विवेचनं कर्त्तुं शोधप्रबन्धोऽयं प्रस्तूयते ।

**दृढमनोभावनाया: विकास:**

स्वस्य सर्वान् सङ्कोचान् त्यक्त्वा साहसी तथा उत्साही भव इति भगवान् श्रीकृष्ण: अर्जुनं प्रति उपदेशयति । जीवने सकारात्मक-प्रवृत्तिवर्धनार्थं मानवानां हृदयस्थानां लुक्कायित-शक्ति-सामर्थ्यानां प्रकाशनम् अपरिहार्यम् । गीतायां लिखितमस्ति यत्-

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।

अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन ॥ (श्रीमद्भगवत्गीता, २/२)

मूल्यमिदम् एकं सफलजीवन-यापनार्थम् आद्योपकरणं वर्तते । पाठ्यक्रमं प्रति ध्यानाकर्षणं भवति शिक्षाया: केन्द्रविन्दु:, येन छात्रा: शङ्कारहिता:, सशक्ता:, एकाग्रचित्ता:, विचारशीला:, विनम्रा: च भूत्वा उत्साहिता: भविष्यन्ति । शिक्षाया: सम्यक् परिचालनार्थम् एतेषां सद्गुणानां विकास: अपरिहार्य: । भय-सन्देहादय: शिक्षाया: साधनं नैव भवति, अपितु हृदय-मस्तिस्कयो: सम्यक्-विकास: एव चरम-लक्ष्यो वर्तते ।

**वीरत्त्वम्**

जीवने आगतानां सर्वासां समस्यानां सम्मुखीना करणीया इति श्रीमद्भगवत्गीतायां सूचितमस्ति । यथा-

क्लैवं मा स्म गम: पार्थ नैतत्त्वय्युपपद्यते ।

क्षुद्रं हृदयदौर्वल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ (श्रीमद्भगवत्गीता, २/३)

**मनस:** सर्वान् भयभावान् त्यक्त्वा विजिगीषु भव इति भगवान् श्रीकृष्ण: अर्जुनं प्रति उद्बोधयति । अद्यतनछात्रा: अतीव प्रेरणात्मका: वर्तन्ते । अत: इयं भावात्मकशक्ति: तेषां सफलताप्राप्त्यर्थं साहाय्यं करिष्यति । परन्तु तत्र वीरत्वस्य साहसिकताया: वा मूल्यं ह्रासो भविष्यति । अनेन आवेगपूर्ण-व्यवहारेण पराजय-भावना अपि आविर्भवति । अत: इयं भावना जीवने समस्या उत्पादयति । पुनश्च गीताया: अस्य लिखितसाख्यस्य कुप्रभाव: नवयुवकानां प्रगतिशील-प्रवृत्या: आश्रयस्थलो भवति । अत: तेषां मनसि हिंसा, आत्मघातक: चेत्यादय: भावना जागर्ति । शिक्षाक्षेत्रे अपि छात्राणां सर्वाङ्गीणविकासार्थम् अस्य मूल्यस्य यथायोग्यं ध्यानं देयम् ।

**सन्देहानां स्वष्टीकरणम्**

अर्जुन: स्वमनसि स्थितानां सर्वेषां प्रश्नानां स्वष्टतया उत्तरं ज्ञातुं श्रीकृष्णाय पृच्छति । यथा-

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।

इषुभि: प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ (श्रीमद्भगवत्गीता, २/४)
न चैतद्विद्म: कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयु: ।
यानेव हत्वा न जिजीविषाम-

स्तेऽवस्थिता: प्रमुखे धार्त्तराष्ट्रा: ॥ (श्रीमद्भगवत्गीता, २/६)

समुचित-स्वभावस्य विकासार्थं सम्यक् स्वष्टीकरणार्थं च मानव-विचाराणाम् आदान-प्रदानम् अत्यावश्यकं वर्तते इति अस्मात् ज्ञायते । अत: छात्राणां सन्देहानां स्वष्टीकरणम् अध्यापकै: अवश्यं करणीयम् ।

**विनम्रताभावेन मार्गदर्शनार्थं गुरवे निवेदनम्**

धर्माधर्मं कर्त्तव्याकर्त्तव्यं वा निर्णेतुम् असामर्थ्य: अर्जुन: भगवत: श्रीकृष्णस्य शरणं गत्वा कथयति यत्-

कार्पण्यदोषोपहतस्वभाव:
पृच्छामि त्वां धर्मसंमूढचेता: ।
यत् श्रेय: स्यान्निश्चितं व्रूहि तन्मे

शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥( श्रीमद्भगवत्गीता, २/७)
न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम्
अवाप्य भूमावसपत्नमृद्धं

राज्यं सुराणामपि चाधिपत्यम् ॥ (गीता, २/८)

साम्प्रतिके युगे जना: अधिकतया आत्मनिर्भरशीला: आत्मकेन्द्रिता: च भवन्ति । कोऽपि कस्मात् अपि पथप्रदर्शनं न कांक्षति । अनेन विविधा: समस्या: आविर्भवन्ति । अत: छात्रा: अतीव विनम्रभावापन्ना: सन्त: तेषां सर्वा: समस्या: समाधातुम् अध्यापकेभ्य: प्रश्नान् पृष्ठेयु: ।

**आत्मसचेतनता**

जीवनस्य महत्त्वपूर्णं मूल्यं तथा कठिनां समस्यां सङ्केतयन् गीतायां कथितमस्ति यत्-

एवमुक्त्वा हृषीकेशं गुड़ाकेश: परन्तप ।

न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं वभूव ह ॥ (श्रीमद्भगवत्गीता, २/९)

साम्प्रतिके समाजे मानवानाम् अध्यात्मज्ञानस्य अभाव: दरीदृश्यते । एकस्मिन् पक्षे मानव सर्वदा विविधान् बाह्यमार्गान् निरमाति, पक्षान्तरे सैव मानव: अन्येषां शक्तिं, सामर्थ्यं, मनोवृत्तिं, प्रवृत्तिं च विस्मरति । येन विविधा: समस्या: परिलक्ष्यन्ते तथा मानव: परिस्थित्या: समक्षे

काष्ठपुत्तलिका इव कार्यं करोति। शिक्षाक्षेत्रे मूल्यमिदम् आत्मसचेतनतां प्रति केन्द्रितं करोति । एषा आत्मसचेतनता जीवनस्य सफलताप्राप्तिनिमित्तं सम्यक्तया प्रोत्साहयति।

**कर्त्तव्यपरायणम्**
सांसारिक-आध्यात्मिकविकासयोः मूल्यं सूचयन् भगवता श्रीकृष्णेन निगदितं यत्-

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि ॥ (श्रीमद्भगवत्गीता, २/३८)

मानवानां कर्त्तव्याकर्त्तव्यविषये अत्र आलोचितमस्ति । सामाजिकानां कृते इदं मूल्यं सर्वश्रेष्ठो भवति। कारणं साम्प्रतिक-समाजे मानवानां हृदि कर्तव्यसंपादनार्थं बाह्यप्रेरणा तथा फलाकांक्षा विवर्धते । यस्य फलस्वरूपं विविधाः प्रतारणाः भ्रष्टाचाराः च अवलोक्यन्ते । कर्त्तव्यपरायणता, चेतनायाः आन्तरिकाभिवृद्धिः वा श्लोकेऽस्मिन् मञ्जुलतया वर्णितमस्ति। पुनश्च मानवः सर्वेषु कार्येषु धर्यवान् भवेत् इति भगवान् श्रीकृष्णः सूचयति । कर्त्तव्यसम्पादने हानिलाभयोः, सुखदुःखयोः, जयपराजययोः विवेचनं समरूपं भवितव्यम् इति आशयः। यदि अयं मनोभावः कस्यचित् मनसि जागर्ति, तर्हि स उत्तमः इति परिगण्यते।

**वाक्-संयमः विचारशीलता च**
संसारेऽस्मिन् सकामपुरुषाणां भाषणं केवलमात्र वाक्-चातुर्यम् एव भवति, यत् अलंकृतभाषणं हृदयमात्रं प्रसादीकरोति। परन्तु ज्ञानीजनाः जगतः नश्वरतां ज्ञात्वा सर्वदा वाक्-संयमाः स्थिरबुद्धियुक्ताः च भवन्ति। भगवता श्रीकृष्णेन कथितं यत्-

यामिमां पुष्पितां वाचः प्रवदन्त्यविपश्चितः।

वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ (श्रीमद्भगवत्गीता, २/४२)

एतत् अनावश्यकं श्रमसाध्य-भाषणम् अस्माकं दैनिक-जीवने वहुप्रकारकाः समस्याः उत्पादयति। अतः मूल्यमिदम् अनपेक्षिता शङ्का अपि जनयति।

**कर्मयोगसाधनया फलत्यागभावना**
भागवतः श्रीकृष्णस्य मतानुसारं सर्वेषां मानवानां केवलं कर्मणि एव अधिकारः अस्ति, न तु कर्मफलेषु । अधिकारस्यास्य सदुपयोगः करणीयः । निरन्तरं फलेच्छा-त्यागपूर्वकम् अनासक्तः सन् कर्म एव करणीयम्। उक्तं च श्रीकृष्णेन –

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
माकर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि ॥ (श्रीमद्भगवत्गीताए २/४७)

परमात्मप्राप्त्यर्थम् अहंत्व-ममत्व-आशक्तिः चेत्यादीः त्यक्त्वा स्वकर्त्तव्यकर्मकरणेन एव मानवजन्म सार्थको भवति । शैक्षिक-विकासार्थमपि इदं मूल्यम् अपरिहार्यम्।

**समत्वयोगेन कार्यसम्पादनम्**
उक्तं च भगवता श्रीकृष्णेन-

योगस्थः कुरु कर्मणि सङ्गं त्यक्त्वा धनञ्जय।

सिध्यसिध्योः समोभूत्वा समत्वं योग उच्यते ॥ ॥ (श्रीमद्भगवत्गीता, २/४८)

आसक्तित्यागपूर्वकं सिध्यसिध्योः समः भूत्वा कर्माणि कर्त्तव्यानि । सर्वासु परिस्थितिषु चेतनाशक्तेः, सन्तुलित-मनोभावस्य, स्थिरबुध्याः, शान्तमनसः च समुचितविकासार्थं मानवजीवनस्य एकं गुरुत्वपूर्णं सत्यं श्लोकेऽस्मिन् भगवान् श्रीकृष्णः प्रतिपादयति । अतः छात्राणाम् उत्तमभविष्यतनिर्माणार्थम् उपदेशप्रदानसमये मूल्यस्यास्य स्वष्टीकरणम् अतीव महत्वपूर्णं वर्तते।

**धैर्यं सहनशीलता च**
गीतायां भगवान् श्रीकृष्णः अर्जुनं प्रति कथयति यत्-

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धनविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ॥

(श्रीमद्भगवत्गीता, २/५१)

अर्थात् समत्वबुद्धेः सम्यक्-विकासार्थं सहनशीलता अनिवार्या। एवञ्च यदि मानवः सर्वेषु कार्येषु फलासक्तिं त्यजति, तर्हि निष्पापः सन् मोहरूपं पङ्कम् अतिक्रम्य परमपदं प्राप्नोति। अतः शैक्षिकानुष्ठाने अपि प्रथमतः छात्राणां निरन्तरं प्रयासः एव समुज्वलभविष्यतगठनार्थम् अत्यावश्यकः इति सूचना प्रदेया।

**राग-भय-क्रोधान्मुक्तः**
श्रीमद्भगवत्गीतायां स्थितप्रज्ञस्य लक्षणं भगवता श्रीकृष्णेन वर्णितं यत्-

प्रजाहति यदा कामान् सर्वान् पार्थ मनोगतान्।

आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥( श्रीमद्भगवत्गीता, २/५५)
दुःखेष्वनुद्विग्नमना सुखेषु विगतस्पृहः।

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ (श्रीमद्भगवत्गीता, २/५६)
यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।

नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥( श्रीमद्भगवत्गीता, २/५७)
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।

इन्द्रियाणिन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥(श्रीमद्भगवत्गीता, २/५८)

अत्र स्थितप्रज्ञस्य लक्षणं वर्णितमस्ति ।य: जन: सर्वदा शुभाशुभं वस्तु प्राप्य नाभिनन्दति द्वेषं च नैव करोति, स: स्थितप्रज्ञ: इत्युच्यते। एवञ्च स्थितप्रज्ञ: सर्वदा इन्द्रियनिग्रहं कृत्वा अनाशक्त: सन् राग-भय-क्रोधात् विमुक्तो भवति। मूल्यमिदं मानवजीवने अत्यावश्यकं वर्तते। येन मानव: लौकिकसुखं सम्यक्-विचार्य स्वस्य दैनन्दिनीं प्रक्रियां सार्थकं कर्त्तुम् अग्रेसरति।

**इन्द्रियसंयम:, मनोनिग्रह:, आत्मश्रद्धा च**

मानवानाम् आचरणे व्यवहारे वा इन्द्रियाणां नियन्त्रणस्य प्रभावस्य च सिद्धान्त: गीतायां सम्यक्तया प्रतिपादितोऽस्ति। उक्तं च –

ध्यायतो विषयान् पुंस: सङ्गस्तेषूपजायते।
सङ्गत् सञ्जायते काम: कामात् क्रोधोऽभिजायते ॥ (श्रीमद्भगवत्गीता, २/६२)
क्रोधाद्भवति सम्मोह: सम्मोहात् स्मृतिविभ्रम:।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ (श्रीमद्भगवत्गीता, २/६३)
तस्मादस्य महावाहो निगृहीनानि सर्वश:।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ (श्रीमद्भगवत्गीता, २/६८)

अर्थात् विषयासक्तपुरुषस्य आसक्तित: कामना समुत्पद्यते। पुनश्च कामात् क्रोधो अभिजायते । क्रोधात् सम्मोह:, सम्मोहात् स्मृतिविभ्रम:, स्मृतिभ्रंशात् च बुद्धे: नाशो भवति। अत: मानव: स्वस्य सर्वान् इन्द्रियान् संयम्य स्थितप्रज्ञ: भवितव्य: । अयं इन्द्रियसंयम: एव मनोनिग्रह: वर्तते इति भगवान् श्रीकृष्ण: कथयति। यथा-

तानि सर्वाणि संयम्य युक्त आसीत् मत्पर:।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ (श्रीमद्भगवत्गीता, २/६१)

अनेन इन्द्रियसंयमेन मनोनिग्रहेण वा मानव: स्वजीवनम् उत्कृष्टं कृत्वा अग्रेसरति । गीतायां प्रसन्नचेतस: साधकस्य आत्मसाक्षात्कारविषये आलोचितमस्ति यत्-

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ (श्रीमद्भगवत्गीता, २/६४)
प्रसादे सर्वदु:खानां हानिस्योपजायते।
प्रसन्नचेतसो ह्यशु बुद्धि: पर्यवतिष्ठते॥ (श्रीमद्भगवत्गीता, २/६५)

यदि मानवस्य आत्मसंयम: अभिवर्धति, तर्हि तस्य जीवने गुणात्मकाभिवृद्धि: अपि जायते । अत: स्वजीवनं सार्थकं कर्त्तुं स्वस्य आत्मिक-प्रयास: एव यथेष्ट: इति श्लोकेऽस्मिन् सूचितोऽस्ति।

**नि:स्वार्थभावना**

**य:** मानव: सर्वान् कामान् विहाय निर्मम:, निरहङ्कार:, निस्पृह: च भवति, सैव परमां शान्तिं प्राप्नोति इति गीतायां भगवान् श्रीकृष्ण: कथयति। यथा-

विहाय कामान् य: सर्वान् पुमांश्चरति।
निर्ममो निरहङ्कार: स शान्तिमधिगच्छति ॥ (श्रीमद्भगवत्गीता, २/७१)

अर्थात् मानवजीवने परम-शान्तिप्राप्त्यर्थम् अहंभावनाया: त्याग: अत्यावश्यक:।

**उपसंहार:**

श्रीमद्भगवत्गीता भारतीयसंस्कृते: प्राणभूता भवति । श्रुतीनां, स्मृतीनां, सर्वोपनिषदां सकलशास्त्राणां च यत् सारभूततत्त्वानि सन्ति, तानि सर्वाणि श्रीमद्भगवत्गीतायां सुगमया सुबोधया च गिरा श्रीकृष्णार्जुनसम्बादरूपेण चारुतया चित्रितानि । व्यक्तिगततया तथा सामूहिकतया मानवव्यवहारस्य पथं प्रदर्शयति श्रीमद्भगवत्गीता। ज्ञान-भक्ति-कर्मयोगसमन्विता इयं गीता मानवीयमूल्यनिर्धारणे सर्वाग्रगण्या सर्वजनविदिता च । शिक्षाया: सम्यक्-परिचालनार्थं सर्वेषां सद्गुणानां समन्वय: अत्र विद्यते । उत्तमचरित्रनिर्माणार्थं च मानवीयविचाराणाम् आदानप्रदानम् अपरिहार्यम् इति गीयाया: सांख्ययोगे स्पष्टतया उल्लिखितमस्ति । भगवता श्रीकृष्णेन जीवने सफलताप्राप्त्यर्थम् आत्मसचेतनतां प्रति निर्देशो विहितोऽस्ति। स्वधर्मपालनमेव मानवानां परमकर्तव्यमिति मूल्यशिक्षा अत्र निर्देशितास्ति । फलेच्छा-त्यागपूर्वकं कर्त्तव्यकर्मकरणेन एव मानवजन्म सार्थको भवतीति शिक्षा अत्र लभ्यते। एवंरूपेण श्रीमद्भगवत्गीताया: सांख्ययोगे बहुविधा: मूल्यशिक्षा: सन्निवेशिता: सन्ति।

**सहायकग्रन्थादीनां सूची**

१. गोयन्दका जयदलाल (टीकाकार) - श्रीमद्भगवतगीता, गीताप्रेस, गोरखपुर, षोड़श मुनर्मुद्रण -२०१०
२. पाण्डेय डाँ. रामशकल एवं मिश्र डाँ. करुणाकर - मूल्यशिक्षा, अग्रवाल पब्लिकेशन्स, आग्रा
३. शर्मा आर. के, शर्मा एच्, एस्- मूल्यशिक्षा एवं मानवाधिकार

४. साहु डाँ. सोमनाथः- शिक्षायाः दार्शनिकाधाराः, सुशीला पब्लिकेशन्स, बलाङ्गीर
५. स्वामी स्वरूपानन्द - श्रीमद्भगवतगीता, अद्वैत आश्रम, कोलकत्ता
६. शिक्षासुधा. (ISSN: 2249-491X) त्रैमासिकी शैक्षिकसंस्कृतशोधपत्रिका, शिक्षासुधासम्पादनसमिति, पुरी
७. Agrawal J.C. (2005) Education for Values, Environment and Human Right, Shipra Publications, Delhi-92.2-11.
८. Goel A. and Goel S.L. (2005) Human Values and Education, Deep Deep Publishers, New Delhi, 275-283
९. Websides Explored-
१०. https:// shodhganga.inflibent.ac.in